* ओ३म् *

अथ वेदांगप्रकाशः

तत्रत्यः सप्तमो भागः

अव्ययार्थः

* ओ३म् *

अथ वेदांगप्रकाशः

□□

तत्रत्यः सप्तमो भागः

अव्ययार्थः

□□

पाणिनिमुनिप्रणीतायामष्टाध्यायाम् षष्ठो भागः
श्रीमत्स्वामिदयानन्दसरस्वतीकृतव्याख्यासहितः ।।
पठनपाठनव्यवस्थायां नवमं पुस्तकम् ।।

□□

अजमेरनगरे वैदिक-यन्त्रालये मुद्रितम् ।।

□□

इत्यादि । और
। बदलते नहीं किन्तु

सम्वत् २०४८ वि.

आठवीं बार २०००

॥ ओ३म् ॥

अथ भूमिका

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

जो शब्दस्वरूप तीनों लिङ्गों, सातों विभक्तियों और इनके एकवचन, द्विवचन, बहुवचन (सात विभक्तियों के तीन-तीन के हिसाब से सात तिये इक्कीस वचनों) में एक से बने रहें अर्थात् जैसा उनका स्वरूप प्रथम हो वैसा ही मध्य और अन्त में भी बना रहे, जिनमें कोई विकार न हो, उनको अव्यय शब्द कहते हैं ।

इनका पाठ अकारादि क्रम से इस ग्रन्थ में लिखा है । ये अव्यय शब्द पद, वाक्य और क्रिया के साथ सम्बन्ध रखते हैं और कहीं-कहीं कोई-कोई अव्यय प्रकृति के अर्थ को विलक्षण करके दिखला देता है जैसे प्र, परा, वि, इत्यादि—

(भवः) किसी का नाम वा संसार और (प्रभवः) उत्पत्ति ।

(जयः) जीत और (पराजयः) हार ।

(भूः) जो होता है और (विभुः) व्यापक इत्यादि । और (च) (वा) आदि शब्द प्रकृति के अर्थ को बदलते नहीं किन्तु सहायक होते हैं ।

जिसलिये वेदादि शास्त्रों में इनके प्रयोग आते हैं इसलिये इनका अर्थ विदित करना कराना सब को उचित है, क्योंकि विना अर्थज्ञान के कुछ भी लाभ नहीं हो सकता ।

इस ग्रन्थ में तीन प्रकार का क्रम रक्खा गया है । प्रथम मूल अव्यय, दूसरे कोष्ठ में उनका अर्थ, और तीसरे कोष्ठ में अव्ययों के उदाहरण रख दिये हैं ।

इस ग्रन्थ को संस्कृत में बनाने का यही प्रयोजन है कि इस पुस्तक के पूर्व, सन्धि विषय आदि ग्रन्थों को क्रमशः जो लोग पढ़ेंगे उनको संस्कृत का समझना कुछ कठिन नहीं पड़ेगा और संस्कृत बोलने लिखने में भी उपयोगी होगा ।।

इति भूमिका ।।

ओ३म्

अथाऽव्ययार्थः ॥

अव्ययानि	अर्थाः	उदाहरणानि
	अ	
अथा, अथ	मङ्गलाऽनन्तराऽऽरम्भप्रश्नकार्त्स्न्याधिकारेषु	(मङ्गले) अथातो ब्रह्म जिज्ञासा। (अनन्तरे) वेदमधीत्याऽथ धर्मो जिज्ञासितव्यः। (आरम्भे) अथाऽध्येतव्यम्। प्रश्ने (अयं) वक्तुं समर्थोऽथ न समर्थः। (कार्त्स्न्ये) अथ वेदार्थं ब्रूमः। (अधिकारे) अथ शब्दाऽनुशासनम् ॥
अति	क्रान्तप्रकर्षोल्लङ्घनाऽतिशयपूजनेषु	(क्रान्ते) मालमतिक्रान्तोऽतिमालः। (प्रकर्षे) अत्युत्तमो विद्वान्। (लंघने) अतिवेलम्भुङ्क्ते। (अतिशये) अतिबली देवदत्तः। (पूजने) अत्यादृतः ॥
अतीव	अतिशयाऽर्थे	अतीव शोभते धर्मी ॥
अलम्	भूषणपर्याप्तिशक्तिवारणेषु	(भूषणे) विद्ययाऽलङ्कृता कन्या। (पर्य्याप्तौ) अलं भोक्ता। (शक्तौ) अलं वीरो वीराय। (वारणे) अलं महीपाल तव श्रमेण ॥

अव्ययानि	अर्थाः	उदाहरणानि
अग्रतः, अग्र	पुरार्थे	अग्रतो याहि । अग्रे गच्छ ।।
अनु	पश्चात्सादृश्यलक्षणेत्थम्भूताख्यानभागवीप्सासु	(पश्चात्) गुरुमनुगच्छति शिष्यः । (सादृश्ये) वेदमन्वाचरति विद्वान् । (लक्षणे) वृक्षमनुविद्योतते विद्युत् । (इत्थम्भूताख्याने) साधुर्विद्वाननु । (भागे) यदत्र मामनुस्यात्तद्देहि । (वीप्सायाम्) पदपदमनुचिन्तयति ।।
अभितः	समीपोभयतःशीघ्रसाकल्याभिमुखसर्वतोभावेषु	(समीपे) प्रयागमभितो गङ्गा । (उभयतः) अभितो भवतु सेना । (शीघ्रे) अभितोऽधीष्व । (साकल्ये) अभितो वनं दग्धम् (अभिमुखे) अभितो दीपे शलभाः पतन्ति । (सर्वतोभावे) अभितो वर्षति मेघः ।।
अहह	अद्भुतखेदयोः	(अद्भुते) अहह बुद्धिप्रकर्षो राज्ञः । (खेदे) अहह मया कालो व्यर्थो नीतः ।।
अभीक्ष्णम्, असकृत्	वारम्वाराऽर्थो	अभीक्ष्णं विचार्य्यं वक्तव्यम् । असकृदध्यापनीया विद्यार्थिनः ।।
अञ्जसा, अह्नाय	द्रुते	अश्वोऽञ्जसा धावति । अह्नाय सूर्येण तमो निरस्तम् ।।
अन्तरेण अन्तरा, अन्तरे	वर्जनामध्ययोः	(वर्जने) विद्यामन्तरेण कुतः शान्तिः । (मध्ये) अनयोर्ग्रामयोरन्तरा नदी । अनयोरन्तरे तिष्ठामि ।।

अव्ययानि	अर्थाः	उदाहरणानि
अवश्यम्	निश्चये	सर्वैर्मनुष्यैरवश्यं वेदः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।।
अर्वाक्	अवरे	अर्वागागच्छ दुष्टात्मन् !
अस्तम्	अदर्शने	सायमस्तमितो रविः ।।
अस्ति	सत्वेऽर्थे	अस्तीदं जङ्गमं जडम् ।।
अङ्ग	पुनरर्थसम्बोधनयोः	मूर्खोऽपि नावमन्यते किमङ्ग विद्वान् । अङ्ग देवदत्त !
अद्य	वर्त्तमानेऽहनि	अद्यायाहि मया सह ।।
अपरेद्युः,	अपरदिने	अपरेद्युर्गमिष्यामि ।।
अधरेद्युः		अधरेद्युस्त्वमागच्छेः ।।
अन्येद्युः	अन्यस्मिन्दिने	
अन्यतरेद्युः	अन्यस्मादन्यस्मिन्दिने	आगतोऽन्यतरेद्युः सः ।।
अपि	पदार्थसंभावनाऽन्ववसर्गगर्हासमुच्चयशङ्काप्रश्नेषु	(पदार्थे) सर्पिषोऽति स्यात् । (सम्भावने) अपि सिञ्चेन् मूलकसहस्रम् । (अन्ववसर्गे) अपि स्तुहि । (गर्हायाम्) देवदत्तमपि कामिनम् । (समुच्चये) पठोपि पाठय । (शङ्कायाम्) अपि चोरो भवेत् । (प्रश्ने) त्वं किमपि जानासि ?
अद्धा		विद्यामद्धावैहि । अञ्जसा
अञ्जसा	स्वीकारे	धर्म्ममाचर ।

अव्ययानि	अर्थाः	उदाहरणानि
अधरात्, अधरेण, अधस्तात्	एतेऽधोदिग्देश-कालवाचकाः	अधरात्, अधरेण, अधस्ताद्गच्छेत्यादि ॥
अव	विनिग्रह-क्रियायोगयोः	(विनिग्रहे) अवग्रहः । (क्रिया-योगे) अवतिष्ठते ॥
अधि	उपरिभावैश्वर्य्य-क्रियायोगेषु	(उपरिभावे) अधिष्ठाता । (ऐश्वर्ये) अधिराजः । (क्रिया-योगे) अधिगच्छेत्तु तान्स्वयम् ॥
अमा	सहसमीपयोः	(सहाऽर्थे) मित्रेणाऽमाभुङ्क्ते (समीपे) अमात्यो राजानम्-मागच्छति ॥
अधुना	वर्त्तमानकाले	अधुना गच्छामि ॥
अन्तर्	मध्ये	अन्तः शोचति ॥
अवस्	रक्षणादिषु	अवोयाहि ॥
अधस्	अर्वाग्गतौ	वृक्षैरधः पतितः ॥
अन्यत्	भिन्नेऽर्थे	अस्मादिदमन्यत्करोषि ॥
अम्	अङ्गीकारे	अमस्तुयत्त्वयोक्तम् ॥
अरे	कनिष्ठसम्बोधने	अरे मैत्रेयि !
अनुकम्	आनुकूल्ये	अनुकं गच्छ ॥
अध	आनन्तर्य्ये	भोजनं कृत्वाऽध गच्छ ॥
अहोबत	अनुकम्पाखेदयोः	(अनुकम्पायाम्) अहोबत न हन्तव्यः । (खेदे) अहोबत मे मृतः पुत्रः ।
अमुत्र	भवान्तरे	अमुत्र जायते जन्तु ॥

अव्ययानि	अर्थाः	उदाहरणानि
अहो	विस्मये	अहो रूपं पश्य ।।
अ	अभावे	अराजके तु लोकेऽस्मिन् सर्वतो विद्रुते भयात् ।।
अस्तु	असूयाङ्गी-कारयोः	(असूयायाम्) अस्तु तवेदं कथनम् । (अङ्गीकारे) अस्तु त्वद्वचः सत्यम् ।।
अप	पृथग्भावे	अपेतः ।।
अह	विनिग्रहार्थीयः	अयमहेदं करोतु ।।
अपष्ठु	निन्दाशोभार्थयोः	(निन्दायाम्) अपष्ठु भृत्योऽयम् । (शोभार्थे) अपष्ठु पठत्ययम् ।।

आ

अव्ययानि	अर्थाः	उदाहरणानि
आशु	शीघ्रार्थे	आश्वध्यापय ।।
आङ्	अर्वागीषदर्थ-क्रियायोगमर्या-दाभिविधिषु	(अर्वाञ्चि) आकाशाद्वायुः । (ईषदर्थे) आपिङ्गलः (क्रियायोगे) आगच्छति । (मर्यादायाम्) आसमुद्राद्राजदण्डः । (अभिविधौ) आकुमारं यशः पाणिनेः ।।
आस्	कोपपीडयोः	(कोपे) आः पाप किं विकत्थसे । (पीड़ायाम्) आः ज्वरः किं करिष्यति ।।
आ	वाक्यस्मरणयोः	(वाक्ये) आ एवं नु मन्यसे । (स्मरणे) आ एवं किल तत् ।।

अव्ययानि	अर्थाः	उदाहरणानि
आः	स्मृतिवाक्यानुकम्पासु	(स्मृतौ) आः क्व गतन्धनम्। (वाक्ये) आः साधु पठसि। (अनुकम्पायाम्) आः कथमिमं दुःखयसि।
आरात्	दूरसमीपयोः	(दूरे) दुष्टादाराद्वसेत्। (समीपे) श्रेष्ठादाराद्वसेत्॥
आहो	विकल्पे	अथ व्याकरणमधीत आहो निरुक्तम्॥
आम्	अङ्गीकारे	आंकरोमि त्वद्वचः॥
आहोस्वित्	प्रश्नपक्षान्तरयोः	(प्रश्ने) त्वं काशीवास्याहोस्वित्मथुरावासी। (पक्षान्तरे) त्वं वैशेषिकं पठिष्यस्याहोस्विन्न्यायम्॥
आविस	प्राकट्ये	आविर्भाव्या सत्कीर्तिः॥
आनुषक्	आनुकूल्ये	धर्मेणनुषग्वर्त्तितव्यम्॥

इ

अव्ययानि	अर्थाः	उदाहरणानि
इति	हेतुप्रकरणप्रकर्षादिसमाप्तिषु	(हेतौ) शूरो हन्तीति कातरः पलायते। (प्रकरणे) इति वदति पाणिनिः। (प्रकर्षे) इत्याहाऽऽप्तः। (क्रमे) इति व्याकरणमधीते। (अनुक्रमे) इति वेदमध्यापयति पठित्वेत्यर्थः (समाप्तौ) इति प्रथमः पादः॥
इ	भेदरूपोक्तय-	(भेदे) इ अयं पुरुषोत्तमः।

अव्ययानि	अर्थाः	उदाहरणानि
	नुकम्पाऽपाकरणेषु	(रुषोक्तौ) इ दुष्टं हिन्धि । (अनुकम्पायाम्) इ पुत्र सुखी भव । (अपाकरणे) इ यात्वितः खलः ॥
इतरेद्युः	इतरस्मिन्दिने	इतरेद्युः स आगतः ॥
इव	उपमायाम्	आप्त इवायं वदति ॥
इदानीम्	वर्त्तमानकाले	इदानीमस्मि नीरोगः ॥
इद्धा	प्रकाशे	इद्धा तपत्ययं राजा ॥
		ई
ई	विषादानुकम्पयोः	(विषादे) ई अयं दुखं ददाति । (अनुकम्पायाम्) ई अनाथः सुखी भवेत् ॥
ईषत्	अल्पेऽर्थे	ईषद्दत्तमनेनास्मै
		उ
उ	रुषोक्त्यनुकम्पानियोगसम्बन्धपादपूरणेषु	(रुषोक्तौ) उ उत्तिष्ठ दुष्टेतः । (अनुकम्पायाम्) उ अभ्यौषधं कुरु । (नियोगे) उ अयं द्वारि तिष्ठतु । (सम्बन्धे) उ अयं मम प्रियः (पादपूरणे) किमु कार्य्यं मयाऽनघ ॥
उत	प्रश्नाप्यर्थविकल्पेषु	(प्रश्ने) वेदमधीषे उताध्यापयसि । (अप्यर्थे) मा वधीः पितरं मोत मातरम् । (विकल्पे) वेदं पठस्युत वेदाङ्गम् ॥

अव्ययानि	अर्थाः	उदाहरणानि
उररी	विस्ताराङ्गीकारयोः	(विस्तारे) उररीकरोति राज्यम् । (अङ्गीकारे) उररीकुर्य्याद्धर्मम् ।
उच्चैस्	महत्यर्थे	उच्चैः पर्वताः सन्ति ॥
उम्	प्रश्नेऽर्थे	उम् देवदत्तः क्व गतः ॥
उषाः	रात्र्यवसानयोः	(रात्रौ) उषा भवेत्तमोवृता । (तदवसाने) उत्तिष्ठ उषा जाता ॥
उभयेद्युः	उभयोर्दिनयोः	उभयेद्युः कृतं कार्य्यम् ॥
उत्तरेद्युः	आगामदि ने	उत्तरेद्युरहङ्गतः ॥
उदक्, उत्तरात्, उत्तरेण, उत्तरतः	एते उत्तरादिग्देशकालवाचकाः	उदक् उत्तरात्, उत्तरेण, उत्तरतो वा सन्ति वसन्ति वेत्यादि ॥
उपरि, उपरिष्टात्	ऊर्ध्वदिग्देशकालवाचकौ	उपरि, उपरिष्टात्, वा गच्छन्ति पक्षिणः ॥
उप	उपजनसामीप्यक्रियायोगेषु	(उपजने) उपक्रमः । (सामीप्ये) उपकुम्भम् । (क्रियायोगे) उपतिष्ठते ॥
उद्	उत्कृष्टोर्ध्वक्रियायोगेषु	(उत्कृष्टे) उत्तमः । (ऊर्ध्वे) उद्गतः । (क्रियायोगे) उद्यम्यते ॥
उताहो	विकल्पार्थे	त्वं मीमांसा पठस्युताहो वैशेषिकम् ॥
उपांशु	शनैर्जपेऽर्थे	उपांशु जपति ॥
उत्र्, उकञ	उत्प्रेक्षायाम्	किमु विद्वान् धार्मिकः स्यात् । किमुक विद्यया सुखं भवेत् ॥

अव्ययानि	अर्थाः	उदाहरणानि
	ऊ	
ऊरी	विस्ताराङ्गीकारयोः	(विस्तारे) ऊरीकुर्य्याद्विद्याम् । (अङ्गीकारे) ऊरीकुर्य्याद्धिर्मम् ॥
ऊ	पक्षवाक्याऽऽरम्भानुकम्पासुरुक्तौ	(पक्षे) ऊ अयं मम सेवकः । (वाक्यारम्भे) ऊ एवं नु मन्यसे । (अनुकम्पायाम्) ऊ ते दुखं विनश्यतु ॥
ऊम्	रुषोक्तौ	ऊं शत्रुर्हन्तव्यः ॥
ऊर्ध्वम्	ऊर्ध्वदिग्देशकालवाचकाः	ऊर्ध्वं गच्छति वायुः ॥
	ऋ	
ऋ	वाक्यगर्हणयोः	(वाक्ये) ऋ त्वं किं सेवसे । (गर्हणे) ऋ गच्छ पापकृतम् ॥
ऋधक्	स्वीकारे	ऋधक् सत्सङ्गतिं कुरु ॥
ऋते	वर्जनेऽर्थे	ऋते ज्ञानान्न मुक्तिः ॥
	ए	
एवम्	प्रकारोपमाङ्गीकाराऽवधारणेषु	(प्रकारे) एवं कुरु । (उपमायाम् एवम्भूतो देवदत्तः । (अङ्गीकारे) एवमस्तु वेदोक्तम् । (अवधारणे) एष विदुषां मतम् ॥

अव्ययानि	अर्थाः	उदाहरणानि
एव	अवधारणे	सत्यमेव वेदोक्तम् ॥
एकदा	कदाचिदर्थे	एकदाऽत्राऽऽगताः सर्वे ॥
एतर्हि	वर्त्तमानकाले	एतर्ह्यधीते वेदम् ।

ऐ

ऐ	अनुनये	ऐ धर्ममुपदिश ॥
ऐषमः	वर्त्तमाने वर्षे	ऐषमो बालकोऽयं मे ॥

ओ

ओम्	प्रणवोपक्रमाऽनुमतिषु	(प्रणवे) ओं प्रणवः । (उपक्रमे ओमित्येतदक्षरमुद्गीथमुपासीत । (अनुमतौ) ओमिदं सत्यमुक्तमनेन ॥

क

कु	पापकुत्सेषदर्थेषु	(पापे) कुकर्मी । (कुत्सायाम्) कुपुरुषः। (ईषदर्थे) कवोष्णम् ॥
किञ्चित्	अल्पे	किञ्चिदद्य मया भुक्तम् ॥
कामम्	कामानुमत-कामप्रवेदनयोः	(कामानुमते) कामं त्वदीयं कार्यं करोमि । (कामप्रवेदने) कामं मे पुत्रं पाठय ॥
कच्चित्	कामप्रवेदने	कच्चित्कुशलमस्ति ते ॥

अव्ययानि	अर्थाः	उदाहरणानि
कदाचित्	कस्मिंश्चित्काले	कारणमन्तरा कार्यं कदाचिन्न जायते ॥
किल	विद्याप्रकर्ष-निश्चयवार्ता-सम्भाव्येषु	(विद्यायाम्) किलायं विद्वान् । (प्रकर्षे) किलेदं वस्तु ग्राह्यम् । (निश्चये) एवं किलेदमस्ति । (वार्त्तायाम्) जघान कंसं किल वासुदेवः । (संभाव्ये) विद्वांसं किलाश्रयेयुर्विद्यार्थिनः ॥
कम्	वारिमूर्द्धसुखेषु	(वारिणि) कं पिब । (मूर्द्धनि) कं भूषय । (सुखे) मह्यं कं देहि ॥
किमुत किमूत	विकल्पे	त्वं न्यायमधीषे किमुत वेदान्तम् । त्वमायुर्वेदमधीषे किमूत धनुर्वेदम् ॥
किम्	पृच्छाजुगुप्सन-प्रश्नविकल्प-क्षेपेषु	(पृच्छायाम) किं पठसि भोः! (जुगुप्सने) किं पडिण्तो यः पक्षपाती । (प्रश्ने) किमयं पुरुषः ? (विकल्पे) किमैहिककर्म्मजन्यं सुखं दुखं बा पूर्वजन्मकृतम् । (क्षेपे) कश्चासौ राजा किं राजा ॥
कूपत्	कोपे	कथं कूपद्वदसि ॥
कुवित्	बले	कुवित्पुरुषः ॥
केवाली	हिंसायाम्	केवाली करोति दुष्टान् ॥
कणे	श्रद्धाप्रतिघाते	कणे हत्य पयः पिबति ॥

अव्ययानि	अर्थाः	उदाहरणानि
किञ्च	प्राक्पूर्वस्मिन्नवान्तरे	(प्राक्पूर्वस्मिन्) व्याकरणं मयाऽधीतं किञ्चान्यन्नाधीतम् । (अवान्तरे) अनयोः पुरुषयोः किञ्चास्ति ।।
किन्नु	प्रश्नवितर्कयोः	(प्रश्ने) किन्नु तेनोक्तम् । (वितर्के) किन्नु नो दुःखं भवति ।।
किमु	सम्भावनाऽऽमर्शयोः	(सम्भावनायाम्) किमु त्वं विद्यां पठिष्यसि । (आमर्शे) किमु तदेव स्यान्न वा ।

ख

खलु	निषेधवाक्यालङ्कारजिज्ञासाऽनुनयेषु	(निषेधे) खल्वधर्म्मान्निर्गच्छेत् । (वाक्यालङ्कारे) एतत्खल्वाहुः । (जिज्ञासायाम्) व्याकरणं खलु पठामि । (अनुनये) विद्या खल्वध्यापय ।।
खम्	इन्द्रियाकाशब्रह्मसु	(इन्द्रिये) ततः खानि च संस्पृशेत् । (आकाशे) खमाकाशम् । (ब्रह्मणि) खं ब्रह्म ।।

ग

गुलगुधा	पीडार्थे	गुलगुधा करोति जन्तुः ।।

अव्ययानि	अर्थाः	उदाहरणानि

च

अव्ययानि	अर्थाः	उदाहरणानि
च्वि	अभूततद्भाव-संपद्यार्थे	अशुक्लः शुक्लः सम्पद्यते तस्य करणं शुक्लीकरणम् ।।
चिराय, चिररात्राय, चिरस्य, चिरेण, चिरात्, चिरम्	चिरकालार्थाः	चिराय सन्तर्पय धनैः सुपात्रान् । चिररात्राय सञ्चितं वस्तु । चिरस्य दृष्टैव मृतोत्थितेव । चिरेणाऽऽगनोऽसि मित्र । चिरात् स क्व गतोऽस्ति । चिरं विद्या पठनीया ।।
चित्	पूजोपमाऽव कुत्सितासाकल्येषु	(पूजायाम्) आश्चर्य्यञ्चिदिदं ब्रूयात् । (उपमायाम्) दधिचित्तक्रम् । (अवकुत्सिते) कुल्माषांश्चिदाहरति । [असाकल्येषु] एषु कश्चित् करोति ।।
चटु	लौलुप्ये	चट्वयं भोजने ।।
चण, चन	अल्पे	नास्ति किं चण । न जानासि किं चन ।।
च	अन्वाचयसमाहारेतरेतरसमुच्चयपादपूरणेषु	(अन्वाचये) विद्यां पठ गुरुं च सेवस्व । (समाहारे) संज्ञा च परिभाषा च=संज्ञापरिभाषम् । (इतरेतरस्मिन्) धर्मश्च अर्थश्च कामश्च मोक्षश्च=ते धमर्थिकाममोक्षाः । (समुच्चये) ईश्वरं च धर्मं च सेवस्व । (पादपूरणे) स च प्राह सुशान्ताय ।।

अव्ययानि	अर्थाः	उदाहरणानि
	ज	
जातु	कस्मिश्चित्काले	न जातु कामः कामानामुपभोगेन शाम्यति ॥
जोषम्	सुखतूष्णीमर्थयोः	(सुखे) जोषमासीत ॥ (तूष्णीम्) जोषं कुरु ॥
जोक्	शाश्वते	जोक् पश्येम ॥
	झ	
झटिति	द्रुतेऽर्थे	नटो वंशं झटित्यारोहति ॥
	त	
तथाहि	पूर्वसादृश्ये	तथाहि वद ।
तूष्णीम् तूष्णीकाम्	मौनेऽर्थे	कथं तूष्णीं स्थितो विद्वन् । तूष्णीकां भव बालिश ॥
तिरस्	तिर्य्यगर्थे	तिरो दृष्ट्या समीक्षते ॥
तथा	साम्येऽर्थे	तथैवेदमस्ति ॥
तत्, ततः	हेत्वर्थे	यदयं याचते तदस्मै ददामि । यतोऽयं विद्वान् ततोऽध्यापयतु ।
त्वः	विनिग्रहार्थीय-सर्वनामार्द्धनामसु	(विनिग्रहार्थे) ऋचां त्वः पोषमास्ते । (सर्वनाम्नि) त्वे गच्छति त्वस्मै देहि । (अर्द्धनाम्नि) गायत्रं त्वो गायति शक्वरीषु ॥

अव्ययानि	अर्थाः	उदाहरणानि
तदा, तदानीम्	तस्मिन्कालेऽर्थे	क्व गतस्त्वं सखे तदा । तदानीमागमिष्यामि ।।
तु	भेदाऽवधारण-पादपूरणेषु	(भेदे) देवदत्ताद्विष्णुमित्रस्तु बलवान् । (अवधारणे) वेदोक्तन्तु सत्यम् । (पादपूरणे) विद्वांस्त्वध्यापयेच्छिष्यान् ।।
तावत्	मानाऽवधि-साकल्याव-धारणेषु	(माने) तावद्भोक्तव्यं यावत्पच्येत । (अवधौ) तावदध्येयं यावज्जीवनम् । (साकल्ये) तावद्भुक्त यावद्दत्तम् । (अवधारणे) तावदामन्त्रयस्व यावच्छ्रोत्रियम् ।।

द

अव्ययानि	अर्थाः	उदाहरणानि
दक्षिणा, दक्षिणेन, दक्षिणात्, दक्षिणाहि, दक्षिणतः	एते दक्षिणदिग्देशकालवाचकाः	दक्षिणा, दक्षिणेन, दक्षिणात्, दक्षिणाहि, दक्षिणतः, सन्ति वसन्ति वेत्यादि ।।
दिष्ट्या	आनन्देऽर्थे	दिष्ट्या ते दर्शनं भ्रातः ।।
दुःषमम्	निन्द्येऽर्थे	दुःषमं खलु भाषितम् ।।
दिवा	अहन्यर्थे	दिवा त्तमो निवर्त्तते ।
दोषा	रात्रौ रजनीमुखे च	(रात्रौ) दोषा सतारका ख्याता । (रजनीमुखे) दोषा सूर्योऽस्तङ्गतः ।।

अव्ययानि	अर्थाः	उदाहरणानि
दुर्	निन्दाऽर्थे	दुर्बुद्धिः ।।
द्राक्	द्रुतेऽर्थे	द्राग्गच्छति नदी ।।
दुष्ठु	निन्दायाम्	दुष्ठु त्याज्यं वचस्त्वया ।।

ध

अव्ययानि	अर्थाः	उदाहरणानि
धिक्	निर्भर्त्सन-निन्दयोः	(निर्भत्सने) धिक् त्वामनधीतविद्यम् । (निन्दायाम्) धिक् पापिनम् ।।
ध्वंसकला	हिंसार्थे	ध्वंसकला कृत्य गतः ।।

न

अव्ययानि	अर्थाः	उदाहरणानि
नहि, नो, ना	अभावेऽर्थे	नहि विद्वानधर्मे विचरति । नो अधार्मिकान् सेवेत । ना दुष्टेषु रमेत ।।
ननु	शङ्काविनिग्रहयोः	(शङ्कायाम्) नन्वेवं कथमुच्यते । (विनिग्रहे) नन्विदं कुरु ।।
निःषमम्	निन्द्येऽर्थे	निःषमं वदति त्वं मूर्खः ।।
नूनम्	निश्चये	नूनं धर्म्मः सेवनीयः ।।
निकषा	अन्तिके	निकषा गच्छ सन्मित्रान् ।।
नक्तम्	रजन्यर्थे	नक्तं चन्द्रो विभाति ।।

अव्ययानि	अर्थाः	उदाहरणानि
नाम	प्रकाशसंभाव्यक्रोधोपगमकुत्सनेषु	(प्रकाशे) हिमालयो नाम नगाधिराजः । (संभाव्ये) भविष्यति नाम युद्धम् । (क्रोधे) मम शत्रुर्नाम पापः । (उपगमे) जानाति नाम विद्यया (कुत्सने) को नामाऽयं प्रलपति सभायाम् ॥
निस्, निर्	निश्चयनिषेधयोः	(निश्चये) निरुक्तोऽर्थो यास्केन । (निषेधे) अधर्मी निष्काशनीयः ॥
नि	विनिग्रहार्थीयः	नियमः ॥
नु	क्षिप्रपृच्छाविकल्पेषु	(क्षिप्रे) नु गच्छ । (पृच्छायाम्) को नु धर्मोऽस्ति । (विकल्पे) अयं पण्डितो न्वयं पण्डितः ॥
नीचैस्	अल्पाधोऽर्थयोः	नीचैर्धीस्तवास्ति विषयसेवनात् । (अधोऽर्थे) नीचैर्गच्छति पापात्मा ॥
नमस्	नतावर्थे	नमस्कुर्यान्मातरम् ॥
नाना	अनेकार्थे	नाना पदार्थाः ॥
नेत्	निषेधे	नेद्गच्छेद्ग्रामम् ॥
नञ्, नह	प्रतिषेधे	अब्राह्मणः । नहाऽसत्यं वदेयम् ॥
नकिम्, नोचेत्, नचेत्, नकिर्	आकाङ्क्षायाम्	इदं नकिं कृतम् । त्वं पठ नोचेद्दुःखी भविष्यसि । त्वं सत्यं वद नोचेत् त्वां दण्डयेयम् । नकिरिदमाचरणीयम् ॥

अव्ययानि	अर्थाः	उदाहरणानि
ननुच	प्रश्नदुष्टोक्तयोः	(प्रश्ने) ननुचेदं किमस्ति ? (दुष्टोक्तौ) ननुचास्य वचोऽग्राह्यम् ॥
		प
प्र	प्रकर्षगताद्यर्थयोः	(प्रकर्षे) प्रभुः । (गताद्यर्थेषु) प्रगत आचार्यः = प्राचार्यः ॥
परा	प्रकर्षाऽनुत्कर्षयोः	(प्रकर्षे) परागतः । (अनुत्कर्षे) पराजयः ॥
पाट् प्याट्	सम्बोधने	पाट् यज्ञदत्त ! प्याट् देवदत्त! ॥
पृथक्	वर्जनार्थे	दुष्टः पृथक् कार्य्यः ॥
पुनर्	भेदाऽप्रथमयोः	(भेदे) किंपुनर्विद्वाँसो धार्मिकाः । (अप्रथमे) पुनरुक्तमनेन ॥
पुनः पुनः	बारम्बारार्थे	पुनः पुनः सत्पुरुषाः सेवनीयाः ॥
पुरा	प्रबन्धचिरातीतनिकटाऽऽगामिषु	(प्रबन्धे) पुरा पाठयितव्यः । (चिरातीते) पुरातनमिदं स्थानम् । (निकटे) पुराऽऽयाति मेघः । (आगामिनि) पुरा शीतं द्रष्टव्यम् ।
पुरस्तात्	प्राचीप्रथमदेशकालेषु	(प्राच्याम्) पुरस्तादुदेति सूर्यः । (प्रथमे) पुरस्ताद् गच्छ । (देशे, काले च) पुरस्ताद्देशे, काले वा प्राप्तम् ॥

अव्ययानि	अर्थाः	उदाहरणानि
प्रति	प्रतिनिधिप्रतिदानलक्षणेत्थम्भूताख्यानभागवीप्सासु	(प्रतिनिधौ) मन्त्री राज्ञः प्रति । (प्रतिदाने) प्रति तिलेभ्यो माषान् देहि । (लक्षणे) वृक्षं प्रति विद्योतते विद्युत् (इत्थम्भूताख्याने) प्रगल्भं प्रति सम्भाषणीयम् । (भागे) इदं मां प्रति स्यात् । (वीप्सायाम्) वृक्षं वृक्षं प्रति सिञ्च ॥
पश्चात्	प्रतीचीचरमयोः	(प्रतीच्याम्) पश्चादस्तं गतो रविः । (चरमे) पश्चाद्वयसि संन्यसेत् ॥
प्रसीम्	प्रसर्गसीमासर्वतोभावेषु	(प्रसर्गे) प्रसीमादित्योऽसृजत् । (सीमायाम्) प्रसीं समुद्रं गच्छेत् । (सर्वतोभावे) प्रसीं वायुर्वाति ॥
पुरः, पुरतः	सम्मुखार्थे	पुरो गच्छ । पुरतः पठ ॥
प्रेत्य	भवान्तरे	प्रेत्याऽत्र जायते जन्तुः ॥
प्रसह्य	हठार्थे	कथं प्रसह्य करोषि ॥
प्रादुस्	नामप्रकाशप्राकट्येषु	(नाम्नि) प्रादुरासीद्युधिष्ठिरः । (प्रकाशे) प्रादुरासीत्तमोनुदः । (प्राकट्ये) प्रादुस्कृता त्वया विद्या ॥
परितस्	सर्वतोभावे	आयान्तु परितः श्रियः ॥
परमम्, परम्	अङ्गीकारेऽर्थे	परममुक्तं त्वयाऽनघ । परमाप्तोक्तम् ॥

अव्ययानि	अर्थाः	उदाहरणानि
प्राक्	अतीतपूर्वदिग्देश-कालवाचकः	(अतीते) प्रागासीज्जगदुत्पत्तिः। (पूर्वदिशि) प्राग्गच्छन्तु गता वा। (देशे, काले च) प्राग्देशे, काले वा॥
पुनर्	निश्चयपश्चादर्थयोः	(निश्चये) किं पुनर्ब्राह्मणाः पुण्याः। (पश्चादर्थे) पुनर्जन्म॥
प्रायस्	बहुधार्थे	अस्मिन्नगरे प्रायो धनाढ्याः सन्ति॥
प्रगे, प्रातर्	प्रभातेऽर्थे	प्रगे सर्वैर्न शयितव्यम्। प्रातः स्नाहि यदीष्टं स्यात्॥
परुत्	वर्त्तमानात्पूर्वे वर्षे	परुज्जातो बालः॥
परारि	पूर्वतरे वर्षे	परारि जाता कन्येयम्॥
पूर्वेद्युः	पूर्वस्मिन्दिने	पूर्वेद्युरगमं ग्रामम्॥
परेद्यवि	परेऽहनि	परेद्यव्यागतो विद्वान्॥
परश्वस्	तत्परागामिदिने	परश्व आगमिष्यामि॥
प्रत्यक्	पश्चिमदिग्देश-कालवाचकः	प्रत्यग्गच्छन्त्यागच्छन्ति॥
प्रबाहुकम्	प्राबल्ये	प्रबाहुकं कुर्वन्ति दस्यवः॥
प्राध्वम्	बन्धनानुकूलार्थयोः	(बन्धने) प्राध्वं चोरो मया। (आनुकूल्ये) प्राध्वं मित्रो मया॥
		फ
फट्	शैघ्र्ये	फड् वद॥
फलू, फली	विकारेऽर्थे	फलूकृत्य, फलीकृत्य॥
		ब
बाट्	आनुकूल्ये	बाड्गच्छेत्॥

अव्ययानि	अर्थाः	उदाहरणानि
बहुलम्	बहुधार्थे	उणादयो बहुलम् ॥
बहिर्	बाह्योऽर्थे	बहिष्कार्यो दुष्टात्मा ॥
बलवत्	अतिशयाऽर्थे	बलवन्निगृह्णाति ॥
बत	खेदाऽनुकम्पा-सन्तोषविस्मया-ऽऽमन्त्रणेषु	(खेदे) बत महत्कष्टम् । (अनुकम्पायाम्) बतायमरोगः स्यात् । (सन्तोषे) मात्रा पुत्रो बतालिङ्गितः । (विस्मये) किमिदं बत दृश्यते । (आमन्त्रणे) एहि बत सुखं भुङ्क्ष्व ॥

भ

अव्ययानि	अर्थाः	उदाहरणानि
भोः	सम्बोधने	भो शिष्य ! सद्यः पठ ॥
भाजक्	विभागे	भाजगन्नं देयं भिक्षुकेभ्यः ॥
भूरि	बह्वर्थे	भूरि विद्यार्थिनः पठन्ति ॥
भूयम्	पुनः पुनरधिकार्थयोः	(पुनः पुनरर्थे) भूयस्तेऽहं प्रवक्ष्यामि । (अधिकार्थे) भूयो देहि सत्पात्राय ॥
भ्रंसकला	हिंसार्थे	भ्रंसकला कृत्य ॥

म

अव्ययानि	अर्थाः	उदाहरणानि
मुहुः	बारम्बारेऽर्थे	मुहुर्द्रष्टव्यो वेदः ॥
मङ्क्षु	द्रुतेऽर्थे	मङ्क्षु धावन्ति मृगाः ॥

अव्ययानि	अर्थाः	उदाहरणानि
मृषा, मुधा मिथ्या	व्यर्थकेऽर्थे	मृषा वदति धूर्त्तोऽयम् । मुधा मूर्खा भ्रमन्त्यत्र । मिथ्येदं वचनं वेदविरुद्धम् ॥
मनाक्	अल्पेऽर्थे	मनाङ् मुक्तं कथं त्वया ॥
मास्म, मा, मो	वारणे	मास्म कुर्या इदं पुत्र । मा कुर्वधर्मे मनः । मो अह द्विषे धर्मम् ॥
माकिम्	निषेधे	माकिमसत्यं वदेत् ॥
मात्रायाम्	अल्पे	रुग्णेन मात्रायां भोक्तव्यम् ॥
		य
यथायथम्, यथाश्वम्	यथावदर्थे	यथायथं वदत्याप्तः । यथाश्वं धर्मं पालयति ॥
यत्, यतः	हेत्वर्थे	यदयं याचते तदिदं ददामि । यतोऽयं विद्वांस्ततो धार्मिकः ॥
यावत्	मानाऽवधिसाकल्याऽवधारणेषु	(माने) यावद्बुद्धिस्तावदध्येयम् । (अवधौ) यावद्ब्रह्मचर्यं तावदध्येयम् । (साकल्ये) यावद्वेदार्थं तावदधीतम् । (अवधारणे) यावद्भोक्तव्यम् ॥
यथा, यथो	सादृश्यापरभावयोः	(सादृश्ये) यथा, यथो वा देवदत्तस्तथा विष्णुमित्रः पठति । (अपरभावे) यथा, यथो वा धावति ॥
यथार्थम्	सत्येऽर्थे	यथार्थं वदति धर्मात्मा ॥
यथावत्	योग्येऽर्थे	यथावत् कर्म करोति विद्वान् ॥
युगपत्	सहाऽर्थे	आगता युगपत्सर्वे ।

अव्ययानि	अर्थाः	उदाहरणानि
	र	
रै, रे	नीचसंबोधने	रै वा रे जन ॥
विश्वक् विश्वतस्	सर्वतोभावे	विश्वगवस्थितं ब्रह्म । विश्वतो धर्ममाचरेत् ।
वौषट्,वषट्	वाक्यार्थे	बालोमातुर्वौषड् वसेत् । इन्द्रो वषड् वर्षति ॥
वत्, व	साम्येऽर्थे	तद्विदिदम् । इदं व तत् ॥
वि	पृथग्विशेषार्थयो	(पृथगर्थे) विगतः । (विशेषार्थे) विशिष्टः ॥
वा	उपमानिश्चयार्थविकल्पेषु	(उपमायाम्) सिंहो वा क्रुद्धो भवति । (निश्चये) सत्यं वाप्तैः सुसेवितम् । विकल्पे) व्याकरणं पठसि वा वेदम् ॥
वृथा	व्यर्थकेऽर्थे	वृथा पुष्टो देवदत्तः ॥
वै	पादपूरणनिश्चयार्थयोः	(पादपूरणे) अहं त्वां वच्मि वै हितम् । (निश्चये) सत्यं वै सततं ब्रूयात् ॥
वरम्	अङ्गीकारे	वरं विप्रः सुयन्त्रितः ॥
वेलायाम्	समये	वेलायां भोक्तव्यम् ॥
वशम्	स्वाधीनतायाम्	शत्रून् वशन्नयेत् ॥
विक्ली वषली	हिंसायाम्	विक्लीकृत्य । वर्षालीकृत्य ॥

अव्ययानि	अर्थाः	उदाहरणानि
		श
शश्वत्	पुनः सदार्थयोः	(पुनरर्थे) शश्वत्संध्यामुपासीत। (सदार्थे) शश्वत्सत्यं वदेत् ॥
शु	शीघ्रे	शु पठ ॥
शम्	सुखकल्याणयोः	(सुखे) शमस्तु ते। (कल्याणे) शङ्करः ॥
श्रौषट्	वाक्यार्थयोगे	जिज्ञासुर्विदुषुः श्रौषट् गच्छेत् ॥
शमुपजोषम्	आनन्दे	शमुपजोषं सेवन्ताम् ॥
श्वस्	अनागतेऽह्नि	श्वो गन्तास्मि तवान्तिकम् ॥
शकला	हिंसायाम्	शकलाकृत्य ॥
शकृत्	मले	शकृत्कृतं वत्सेन ॥
		स
सम्	एकीभावऽऽनन्दयोः	सङ्गतः घृतं तैले। समागतः सत्पुरुषान् ॥
स्वस्ति	आशीः क्षेमपुण्येषु	(आशिषि) स्वस्ति ते भूयात्। (क्षेमे) स्वस्ति गच्छ। (पुण्ये) स्वस्तिमान् सुखमाप्नोति ॥
स्वित्	प्रश्नवितर्कयोः	(प्रश्ने) देवदत्त किंस्वित्पठितमस्ति ? (वितर्के) अधिकं पाण्डित्यं देवदत्ते स्विद्विष्णुमित्रे ॥

अव्ययानि	अर्थाः	उदाहरणानि
सकृत्	सहैकवारयोः	(सह) सकृत्गच्छन्तु भृत्याः। (एकवारे) सकृद्विवाहं कुर्यात् ॥
साक्षात्	तुल्यप्रत्यक्षयोः	(तुल्ये) साक्षात्सिंहोऽयं वीरः। (प्रत्यक्षे) साक्षान्मुनिर्मया दृष्टः ॥
सीम्	सीमायाम्	विसीमतः सुरुत्रो वेनआवः ॥
सामि	अर्द्ध जुगुप्सयोः	(अर्द्धे) सामि पठितं व्याकरणम्। (जुगुप्सायाम्) साम्यधर्मः सेवितोऽनेन ॥
समया	अन्तिकमध्ययोः	(अन्तिके) समया नगरं नदी। (मध्ये) समया शैलं ग्रामः ॥
स्राक् सपदि, सद्यः	द्रुतेऽर्थे	स्राक् पठति बुद्धिमान्। सपदि धावत्यश्वः सद्योः। याहि ॥
सु	पूजने	सुपुरुषः ॥
साचि	तिर्य्यगर्थे	साचि गमनं करोति सर्पः ॥
साकम्, सार्द्धम्, समम् सत्रा सह		राज्ञा साकं गच्छन्तु। शिष्यैः सार्द्धमागतोऽध्यापकः। पित्रा समं न विवदितव्यम्। मया सत्रा को गच्छेत्। विदुषा सह मन्त्री सदा रक्षेत् ॥
स्वाहा, स्वधा	सङ्गेऽर्थे वाक्यार्थयोगे	अग्नये स्वाहा। पितृभ्यः स्वधा ॥
साम्प्रतम् सम्प्रति	युक्तवर्त्तमानार्थयोः	(युक्ते) क्रमशो वच्मि साम्प्रतम्, सम्प्रति वा। (वर्त्तमाने) साम्प्रतं गच्छामि, संप्रति वा ॥

अव्ययानि	अर्थाः	उदाहरणानि
स्थाने	युक्तेऽर्थे	अयं तिष्ठतु राज्ञः स्थाने ॥
समन्ततस्, सर्वतस्	सवतोभावे	मेघो वर्षति समन्ततः । सर्वतो वाति पवनः ॥
संवत्	वर्षे	प्रभवो नाम संवत् ॥
स्वयम्	आत्मार्थे	स्वयमिच्छामि पठितुम् ॥
सना, सनुतर्, सनत्, सनात्	सर्वदार्थे	सनातनः । सनुतः पुरुषार्थे प्रयतेरन् । सनद्विद्यां सेवन्ताम् । सनाद् बुद्धिं वर्द्धयति विद्वान् ॥
स्म	अतीते	भवति स्म विद्याढ्यो देवदत्तः ॥
सुष्ठु	प्रशंसायाम्	सुष्ठु काव्यं पठसि त्वम ॥
सायम्	संध्यासमये	सायं संध्यामुपासीरन् ॥
सदा, सर्वदा	सर्वस्मिन्काले	धर्मः सदा नरैः सेव्यः । सर्वदा सुखमाप्तव्यम् ।
सजूः,सूपत्	सहार्थे	सजूः, सूपद्वा गच्छन्ति भृत्याः॥
स्रंसकला	हिंसायाम्	स्रंसकला कृत्य ॥
सत्	आदरे	सत्कृत्य । सत्कृतम् । यत्सत्करोति ॥
सहसा	अतर्कित-बलात्कारयोः	(अतर्किते) सहसा करोत्ययं सदा । (बलात्कारे) सहसा विदधीत न क्रियाम् ॥
सम्यक्	दृढप्रशंसयोः	(दृढे) सम्यग्धार्मिकः । प्रशंसायाम् सम्यगध्यापकः ॥

अव्ययानि	अर्थाः	उदाहरणानि
		ह
हन्त	हर्षविषादाऽनुकम्पावाक्यारम्भेषु	(हर्षे) हन्त लाभो महान्प्राप्तः । (विषादे) हन्त नष्टो बन्धुर्मे । अनुकम्पायाम्) हन्त दीनो रक्षितव्यः । (वाक्यारम्भे) हन्त ते कथयिष्यामि ॥
ह	अवधारणविनिग्रहार्थपादपूरणेषु	(अवधारणे) अयमिदं ह करिष्यति । (विनिग्रहे) अयं हेदं करोतु । (पादपूरणे) तं हाऽध्यापयति प्राज्ञः ॥
हि	हेत्वपदेशाऽनुपृष्टाऽसूयाऽवधारणपादपूरण विस्मयेषु	(हेत्वपदेशे) इदं हि करिष्यति । (अनुपृष्टे) कथं हि करिष्यति ! (असूयायाम्) कथं हि व्याकरिष्यति । (अवधारणे) इदं हि कर्त्तव्यम् । (पादपूरणे) अहं हि यास्यामि वरं पुरं तव । (विस्मये) बलं हि वीरस्य समीक्ष्यतां नराः ॥
हूम्	वितर्कपरिप्रश्नयोः	(वितर्के) दुःखमिदानीन्तनेन कर्मणा हूं पुरातनेन । (परिप्रश्ने) हूं देवदत्त त्वया किं किमधीतम्? ॥
हिरुक्	वर्जनेऽर्थे	हिरुग्धर्मेण कुतः सुखम् ॥
हे, है	सम्बोधने	हे विद्वन्नुपदिश ! है अध्यापक पाठय ! ॥
ह्यस्	गतदिने	ह्यः सखायं समागच्छत् ॥

अव्ययानि	अर्थाः	उदाहरणानि
हाहा	खेदहास्ययोः	हाहा पुत्रो मृतो मे । हाहा तव का वार्त्ता ॥
हो	विस्मये	हो वीरेण बहुकृतम् ॥

अथ कृदव्ययानि

से, सेन्, असे, असेन्, क्से, कसेन्, अध्यै, अध्यैन्, कध्यै, कध्यैन्, शध्यै, शध्यैन्, तवै, तवेङ्, [तवेन्], कै, इष्ये, कै, तवे, केन्, केन्य, त्वन्, एश, क्त्वा, तोसुन्, कसुन्, णमुल, कमुल्, तुमुन्, तसिल्, त्रल्, ह, दा, हिल्, धुना, दानीम्, थाल्, थमु, था, अस्ताति, अतसुच, आति, एनप्, आच्, आहि, असि, धा, कृत्वसुच्, सुच्, शस्, ध्यमुञ् धमुञ्, आम्, अम्, तसि, वति, ना, नाञ्, च्वि, साति, त्रा, डाच् ॥

अव्ययानि	अर्थाः	उदाहरणानि
से	तुमर्थे छन्दसि	वक्षे रायः (धनानि वोढुम्) ॥
सेन्	"	ता वामेषे रथानाम् (युवां रथान् गमयितुं समर्थौ) ॥
असे, असेन्	"	क्रत्वे दक्षाय जीवसे (जीवितुम्)॥
क्से	"	प्रेषे भगाय ॥
कसेन्	"	श्रियसे ॥
अध्यै, अध्यैन्	"	कर्म्मण्युपाचरध्यै ॥
कध्यै, कध्यैन्	"	इन्द्राग्नी आहुवध्यै ॥
शध्यै, शध्यैन्	"	सह मादयध्यै ॥

अव्ययानि	अर्थाः	उदाहरणानि
तवै	तुमर्थे छन्दसि	ब्राह्मणेन न म्लेच्छितवै नापभाषितवै ॥*
तवेङ्	,,	दशमे मासि सूतवे ॥
तवेन्	,,	स्वर्देवेषु गन्तवे ॥
कै	,,	प्रयै देवेभ्यः (प्रयातुमित्यर्थः)॥
इष्यै,	,,	अपामोषधीनां रोहिष्यै (रोहणाय), अव्यथिष्यै (अव्यथनाय)॥
के,	,,	दृशे विश्वाय सूर्यम् (द्रष्टुम्), विख्ये (विख्यातुम्) ॥
तवै	कृत्यार्थे छन्दसि	परिधातवै (परिधातव्यम्) ॥
केन्,	,,	नावगाहे (नावगाहितव्यम्)॥
केन्य,	,,	शुश्रूषेण्यः (शुश्रूषितव्यः) ॥
त्वन्	,,	कर्त्वं हविः (कर्त्तव्यम्) ॥
एश्	,,	नावचक्षे (नावख्यातव्यम्) ॥
क्त्वा	प्रतिषेधार्थअलंखलुयोगे। समानकर्त्तृकयोःपूर्वकाले व्यतीहारे वा	अलं खलु वा कृत्वा । पठित्वा पाठयेत् । अपमित्य याचते ॥
तोसुन्	ईश्वर शब्दे उपपदे तुमर्थे भावलक्षणे स्थादिभ्यो वा छन्दसि	ईश्वरोऽभिचरितोः (अभिचरितुं समर्थ इत्यर्थः)। आसंस्थातोर्वेद्यां सीदन्ति । [आ समाप्तेः सीदन्तीत्यर्थः] ॥

* यह उदाहरण कृतार्थ का है । यहां तो 'सोममिन्द्राय पातवै' ऐसा चाहिए ॥ सं. ॥

अव्ययानि	अर्थाः	उदाहरणानि
कुसुन्	ईश्वरशब्दे उपपदे भावलक्षणे वर्त्तमानयोः सृपितृदोस्तुमर्थे वा छन्दसि	ईश्वरो विलिखः (विलिखितुं समर्थ इत्यर्थः)। पुराक्रूरस्य विसृपः (विस्रप्तुमित्यर्थः)। पुराजर्त्तृभ्य आतृदः (आतर्दितुमित्यर्थः) ॥
णमुल्	शक्युपपदे वेदे समानकर्त्तृकयोः पूर्वकाले वा सर्वत्र	अग्निर्वै देवा विभाजं नाशक्नुवन् (विभक्तुमित्यर्थः)। स्मारं २ वेदवत्रोऽधीते (स्मृत्वा स्मृत्वेत्यर्थः)।
कमुल्	शक्युपपदे छन्दसि	अग्निमपलुपं नाशक्नुवन् (अपलोप्तुमित्यर्थः) ॥
तुमुन्	क्रियार्थायां क्रियायामुपपदे	भोक्तुं व्रजति (भोजनायेत्यर्थः) ॥
तसिल्	पञ्चम्यन्तात्	कस्मात् काभ्यां केभ्य इति कुतः। सर्वस्मात् सर्वाभ्याम् सर्वेभ्य इति सर्वत इत्यादि ॥
त्रल्	सप्तम्यन्तात्	सर्वस्मिन्निति सर्वत्र ॥
ह	इदमः किमो वा सप्तम्यन्ताद्वेदे	अस्मिन्ननयोरेष्विति, इह कुहाभिपित्वं करतः। कुत्रचिदस्य सा दूरे क्व ब्राह्मणस्य चावकाः ॥
दा	सर्वादिभ्यः काले	सर्वस्मिन् काले, सर्वदा। कस्मिन् काले, कदा। यस्मिन् काले, यदा। तस्मिन्काले, तदा ॥
र्हिल्	काले	एतस्मिन् काले, एतर्हि। कस्मिन्काले कर्हि। तस्मिन्काले तर्हि। यस्मिन्काले यर्हि।

अव्ययानि	अर्थाः	उदाहरणानि
धुना	इदम् शब्दात् काले	अस्मिन्काले, अधुना ।।
दानीम्	इदं तच्छब्दाभ्यां काले	अस्मिन् काले, इदानीम् । तस्मिन् काले, तदानीम् ।।
थाल्	प्रकारवचने	सर्वेण, सर्वाभ्यां, सर्वैश्च, प्रकारैः, सर्वथा । एवमेव यथा, तथा इत्यादि ।
थमु	इदमः किमश्च	अनेन, आभ्याम्, एभिश्च प्रकारैः, इत्थम् । केन, काभ्यां, कैश्च प्रकारैः, कथम् ।।
था	प्रकारवचने किमो हेतौ छन्दसि च	सर्वेण प्रकारेण सर्वथा । किमो-हेतौ) कथा ग्रामं न पृच्छसि ? (केन हेतुना न पृच्छसीत्यर्थः) ।।
अस्तति	सप्तमी पञ्चमी प्रथमान्ताद्दिग्-वाचिनोदिग्देश-कालेषु	प्राच्यां दिशि, पूर्वस्मिन् देशे काले वा, पूर्वस्या दिशः, पूर्वस्माद्देशात्कालाद्वा, पूर्वादिक्, पूर्वो देशः, पूर्वः काल इति पुरस्तात् ।।
अतसुच्	दक्षिणादिभ्यो-ऽस्तात्यर्थे	दक्षिणतो वसति । दक्षिणत आगतः । दक्षिणतो रमणीयम् । परतो वसति । परत आगतः । परतो रमणीयम् । एवमेव उत्तरत इत्यादि । परस्ताद्वसत्यवरतोऽव-स्ताद्वसतीत्यादि च । प्राग्वसति प्रागागतः प्राग्रमणीयमित्यादि च ।।

अव्ययानि	अर्थाः	उदाहरणानि
आति	उत्तराधरदक्षिणादस्तात्यर्थे	उत्तरादधराद्दक्षिणाच्च वसति, आगतो, रमणीयं, चेत्यादि ॥
एनप्	सप्तमीप्रथमान्तादुत्तरादिभ्योऽस्तात्यर्थेऽदूरे	उत्तरेणाऽधरेण, दक्षिणेन, वसतीत्यादि ॥
आच्	सप्तमीप्रथमान्ताद्दक्षिण शब्दादस्तात्यर्थे	दक्षिणा, वसति इत्यादि ॥
आहि	अस्तात्यर्थे दक्षिणाद्दूरे	दक्षिणाहि, वसन्ति (दूरे इत्यर्थः) ॥
असि	पूर्वादिभ्योऽस्तात्यर्थे	पुरोऽधोऽवश्च, वसतीत्यादि ॥
धा	विधार्थे द्रव्यविचाले वा संख्यातः	एकविध इत्येकधा, एवं द्विधा, बहुधा, त्रिधा, चतुर्धा इत्यादि ॥
ध्यमुञ्	उक्तधाप्रत्ययादेशोऽन्यतरस्यामेकशब्दतः	ऐकध्यम् ॥
धमुञ्	द्वित्रिभ्यां धा प्रत्ययादेशः	द्वैधम्, त्रैधम् ॥
एधाच्	द्वित्रिभ्यां धा प्रत्ययादेशो वा	द्वेधा, त्रेधा ॥
कृत्वसुच्	क्रियाभ्यावृत्तिगणने	पञ्चकृत्वोऽधीतोऽनुवाकः । (पञ्चवारं कृत्वेत्यर्थः । एवमेव षट्कृत्व इत्यादि ॥